# तृतीयः पाठः

# केरलारामः

## पाठप्रवेशः

औषधमिति यदा श्रूयते तदा औषधसस्यानां चित्रमेव मनसि प्रथममागच्छति । अस्मान् परितः बहूनि औषधसस्यानि विराजन्ते । तेषु निम्बः, आमलकी, हरिद्रा, तुलसी, कर्णिकारः, अशोकः इत्यादीनि सस्यानि बहुधा प्रथितानि। एतेषाम् औषधगुणान् भवन्तः ज्ञातवन्तः खलु। अस्मद्देशीयाः इव वैदेशिकाः अपि एतेषाम् औषधगुणान् विज्ञाय निरन्तरोपयोगाय तानि स्वीचक्रुः । कृष्णमरिचस्य 'यवनप्रियम्' इति नामान्तरं तस्य वैदेशिकप्रियत्वं संसूचयति । औषधानां रूपरसगुणादीन् अधिकृत्य वैदेशिकैः अनेके ग्रन्थाः विरचिताः। तेषु अन्यतममधिकृत्य पठामः।

## आमुखम्


वैदिककालादारभ्य औषधसस्यानां रसगुणादिवैशिष्ट्यम् अधिकृत्य अस्मत्पूर्विकाः ज्ञानं सम्पादितवन्तः। वनेचरगोपालकाद्याः जनाः एव एतेषां नामगुणरूपवैशिष्ट्यानि प्रथमतया ज्ञातवन्तः। वनौकोभ्यः प्राप्तमिदं सस्यानाम् आकृतिगुणनामादिकं विज्ञानं स्वीकृत्य पश्चात् शास्त्रकाराः संस्कृत्य शास्त्रान्तरेषु प्रदर्शयन्ति स्म । एवं सस्यानाम् औषधगुणादिकमधिकृत्य विरचितेषु संस्कृतग्रन्थेषु प्रमुखाः भवन्ति धन्वन्तरीनिघण्टुः, राजनिघण्टुः, भावप्रकाशनिघण्टुः, मदनपालनिघण्टुः, द्रव्यगुणसङ्ग्रहः, औषधनिघण्टुः इत्यादयः। एवं केरलेषु विद्यमानानां बहूनामपि सस्यानां महत्त्वप्रकाशनाय विरचितं **होर्त्तूस् मलबारिक्कूस्** नाम ग्रन्थम् अत्र परिचिनुमः।




"भो अनुवाचकाः!, इदानीं भवतां हस्तेषु विशिष्टः कश्चित् ग्रन्थः विराजते । ग्रन्थेऽस्मिन् मलबार् प्रदेशेषु विद्यमानानां वनस्पतीनां महत्त्वं समग्रतया प्रस्तौति । तेषु प्रायेण सर्वाणि सस्यानि औषधगुणसम्पन्नानि भवन्ति....." ।

एवमारभते कस्यचित् ग्रन्थतल्लजस्य भूमिका । **होर्त्तूस् मलबारिक्कूस्** (Hortus Malabaricus ) इत्यस्ति अस्य ग्रन्थस्य नाम । ग्रन्थेऽस्मिन् मलबार् प्रदेशेषु विद्यमानानां प्रमुखानां सस्यानां वैशिष्ट्यं प्रतिपादयति । नेतर्लाण्ड्देशस्य आंस्टर्डां नगरात् १६७८ तमे वर्षे ग्रन्थोऽयं प्रकाशितः । होर्त्तूस् मलबारिक्कूस् इति लाट्टिन् पदस्य अर्थः **मलबार् प्रदेशस्य उद्यानम्** इति भवति ।

प्रख्यातस्य डच् सैनिकस्य **हेन्ड्रिक् वान् रीड्** Hendrik Van Rheede महाभागस्य इच्छाशक्तेः सत्फलमेव होर्त्तूस् मलबारिक्कूस् । केरलेषु उपलब्धानां बहूनां सस्यानाम् औषधगुणान् सः स्वानुभवेन दृष्टान्तेन च ज्ञातवान् । स तेषां समस्तमपि चरित्रं गुणं च स्वकीयान् जनान् उद्बोधयितुम् अभिलषति स्म । तदर्थं स केषाञ्चन केरलीयानां पण्डितानां साहाय्येन बहूनि सस्यानि समाहरत् । तदनु तेषां मूलं, काण्डं, पत्रं, पुष्पं, फलं, बीजम्, इत्यादीनां सर्वेषां सचित्रविवरणं संयोज्य ग्रन्थं व्यरचयत् ।



एवं ग्रन्थरचनायै साहाय्यं प्रदत्तेषु केरलीयपण्डितेषु प्रमुखोऽस्ति **इट्टि अच्युतन्** महाभागः । 'कोल्लाट्ट् वैद्यन्' इति प्रख्यातः सः वैद्यः स्वस्य समस्तमपि ज्ञानम् अस्य ग्रन्थस्य रचनायै समार्पयत् । कोल्लाट्ट् वैद्यकुटुम्बस्य पारम्पर्यसस्यविज्ञानं समस्तं 'चोल् केट्ट पुस्तकम्' इति ग्रन्थे पूर्वमेव समाहृतमासीत् । तस्य वैद्यग्रन्थस्यापि साहाय्येन विरचितं भवति होर्त्तूस् मलबारिक्कूस् । रङ्गभट्ट्, अप्पुभट्ट्, विनायकपण्डिट् इति त्रयः पण्डिताः मदनपालनिघण्टोः साहाय्येन अधिकविवरणं च अयच्छन् । एवं बृहदाकारैः द्वादशविभागैः विरचितोऽस्ति होर्त्तूस् मलबारिक्कूस् ।




ग्रन्थेऽस्मिन् ७४२ सस्यानां समस्तमपि विवरणं सचित्रं प्रस्तौति । कल्पवृक्ष इति प्रख्यातस्य नालिकेरवृक्षस्य गुणस्वरूपादीनि अस्मिन् प्रथमतया वर्णितानि । लाट्टिन्, मलयालम्, अरबिमलयालम्, देवनागरी इति चतसृभिः लिपिभिः सस्यानां नामलेखनम् अत्र दृश्यते । इदं प्रथमतया मलयाललिपिः अस्मिन् ग्रन्थ एव मुद्रिता अभवत् । एतस्य ग्रन्थस्य अध्ययनेन प्राचीनानां केरलीयानां सामान्यचरितं च ज्ञातुं शक्यते ।

इट्टि अच्युतस्य आदरसूचनार्थम् आञ्जिलिवृक्षस्य वंशे समुत्पन्नस्य कस्यचित् नूतनसस्यस्य 'अच्युदेमिया' इति नामकरणं कृतम् । एष ग्रन्थः सस्यशास्त्रज्ञानां, चरित्रपिपठिषूणां बहूपकारकोऽस्ति ।







**पदच्छेदः**

ग्रन्थ एव - ग्रन्थे + एव ।

कल्पवृक्ष इति - कल्पवृक्षः + इति ।

ग्रन्थेऽस्मिन् - ग्रन्थे + अस्मिन् ।

विवरणञ्च - विवरणम् + च ।

प्रमुखोऽस्ति - प्रमुखः + अस्ति ।

**विग्रहः**

वनौकोभ्यः - वनम् ओकः येषां ते वनौकसः, तेभ्यः ।

शास्त्रान्तरेषु - अन्यत् शास्त्रं शास्त्रान्तरम्, तेषु ।

सचित्रम् - चित्रेण सह वर्तते । (यस्मिन् कर्मणि तद्यथा तथा ।)

प्रख्यातस्य - प्रकर्षेण ख्यातः प्रख्यातः, तस्य ।

विज्ञानम् - विशिष्टं ज्ञानम् ।

ग्रन्थतल्लजः - प्रशस्तः ग्रन्थः ।

चरित्रपिपठिषूणाम् - पठितुम् इच्छुः पिपठिषुः, चरित्रस्य पिपठिषुः, तेषाम् ।

## पठनप्रवर्तनानि

**'होर्त्तूस् मलबारिक्कूस्' इति ग्रन्थमधिकृत्य सूचनानुसारं लघूपन्यासं लिखतु ।**

**सूचनाः** – केरलीयसस्यविज्ञानं - हेन्ड्रिक् वान् रीड् - इट्टि अच्युतन् - सचित्रविवरणं- मलयाललिपिः- केरलीयचरित्रपठनम् ।

**श्रद्धेयाः अंशाः**

सूचनानां स्वीकारः ।

वाक्यशुद्धिः ।

उपक्रमाद्या उपन्यासघटना ।

**अन्तर्जालस्य/पुस्तकस्य साहाय्येन अधोदत्तानां सस्यानाम् औषधगुणान् लिखतु।**

| | सस्यम् | | औषधगुणम् |
|---|---|---|---|
| उदा - | **निम्बः** | - | **व्रणनाशकः।** |
| | आमलकी | - | ........................। |
| | तुलसी | - | ........................। |
| | हरीद्रा | - | ........................। |
| | अशोकः | - | ........................। |
| | कर्णिकारः | - | ........................। |
| | ईश्वरमूली | - | ........................। |
| | शङ्खुपुष्पी | - | ........................। |
| | ब्रह्मी | - | ........................। |

**श्रद्धेयः अंशः**

चयनसामर्थ्यम् ।

**यथोचितं योजयत।**

| | | |
|---|---|---|
| **क)** इट्टि अच्युतन् | - | डच् देशीयः । |
| **ख)** कृष्णमरिचम् | - | वैद्यशास्त्रकोशः। |
| **ग)** द्रव्यगुणसंग्रहः | - | कोल्लाट्ट वैद्यन्। |
| **घ)** ऊर्जप्रदायिनी | - | यवनप्रियम्। |
| **ङ)** हेन्ड्रिक् वान् रीड् | - | आमलकी। |

**श्रद्धेयः अंशः**

उचितरीत्या क्रमीकरणम्।

**युष्मान् परितः विद्यमानानाम् औषधसस्यानां वीडियो/ सम्पुटं रचयतु।**

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

उचितरीत्या क्रमीकरणम्।

**अधोदत्तान् सम्भाषणांशान् संभाव्य पूरयत ।**

छात्रः - भो आचार्य !...................... ।

वैद्यः - नमस्ते । ............................ ?

छात्रः - अहम् औषधसस्यान्यधिकृत्य ज्ञातुम् आगतोऽस्मि ।

वैद्यः - पृच्छतु । अहं वदामि ।

छात्रः - ............................ ?

वैद्यः - आम् । कैरल्याम् इदानीमपि औषधसस्यानां सचित्रविवरणग्रन्थाः विरच्यन्ते ।

छात्रः - एवं चेत् कस्यचित् ग्रन्थस्य नाम कृपया वदतु ।

वैद्यः - 'औषधसस्यङ्ङल् ।'

छात्रः - ............................ ?

वैद्यः - डा. एस्, नेशमणि महोदयः भवति अस्य ग्रन्थस्य कर्ता ।

छात्रः - ............................ ?

वैद्यः - अस्य प्रकाशकः केरलभाषा इन्स्टिट्यूट् भवति ।

छात्रः - सन्तुष्टोऽस्मि । धन्यवादः ।

**श्रद्धेयाः अंशाः**

आशयव्यक्तता ।
उचितपूरणम् ।
प्रश्ननिर्माणचातुर्यम् ।

## क्रियापदपरिचयः

**प्रस्तौति -** प्र उपसर्गपूर्वक ष्टुञ् स्तुतौ उभयपदी परस्मैपदे लट् प्र.पु. ए.व ।
प्रस्तौति - प्रस्तुतः - प्रस्तुवन्ति ।

**शक्यते-** शक्लृ शक्तौ कर्मणि आत्मनेपदी लट् प्र.पु. ए.व।
शक्यते - शक्येते - शक्यन्ते।
शक्नोति - शक्नुतः - शक्नुवन्ति (कर्तरि- परस्मैपदी)

**व्यावर्तत -** वि आङ् उपसर्गपूर्वक वृतु वर्तने आत्मनेपदी लङ् प्र.पु.ए.व।
व्यावर्तत - व्यावर्तेताम् - व्यावर्तन्त।

**समार्पयत् -** सम् पूर्वकस्य ऋ गतौ (णिच्) परस्मैपदी लङ् प्र.पु.ए.व।
समार्पयत् - समार्पयताम् - समार्पयन्।

**अयच्छन् -** दाण् दाने परस्मैपदी लङ् प्र.पु.ब.व।
अयच्छत् - अयच्छताम् - अयच्छन्।
(दाण् धातोः लट्, लोट्, लङ्, विधिलिङ् लकारेषु यच्छ् आदेशः)

**समाहरत् -** सम्+आ उपसर्गपूर्वक हृञ् हरणे उभयपदी परस्मैपदे लङ् प्र.पु.ए.व।
समाहरत् - समाहरताम् - समाहरन्।

## अधिकवाचनांशः

**ग्रन्थतल्लजः** - प्रशस्तः ग्रन्थः। तल्लजशब्दः प्रशस्तवाचकः।
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ
प्रशस्तवाचकान्यमूनि - इत्यमरः।

उदा- प्रशस्तः पण्डितः इत्यर्थे -

| | | |
|---|---|---|
| मतल्लिका | - | पण्डितमतल्लिका |
| मचर्चिका | - | पण्डितमचर्चिका |
| प्रकाण्डम् | - | पण्डितप्रकाण्डम् |
| उद्धः | - | पण्डितोद्धः |
| तल्लजः | - | प्रशस्तः ग्रन्थः ग्रन्थतल्लजः |

# शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अनावृष्टिः | वर्षाराहित्यम् | മഴയില്ലായ്മ | ಮಳೆ ಕೊರತೆ | Lack of rain |
| आनन्त्यम् | अनन्तम् | പരിമിതിയില്ലാത്ത | ಅನಿಯಮಿತ | Infinite |
| आरामः | उद्यानम् | പൂന്തോട്ടം | ಉದ್ಯಾನ | Garden |
| ऊषरः | शुष्कप्रदेशः | വരണ്ട പ്രദേശം | ಬಂಜರು ಪ್ರದೇಶ | Dry land |
| कलिन्दजा | यमुना | യമുനാനദി | ಯಮುನಾ ನದಿ | River Yamuna |
| कोटरः | वृक्षरन्ध्रः | മരത്തിന്റെ ദ്വാരം | ಮರದ ರಂಧ್ರ | Tree hole |
| घनम् | सान्द्रम् | ഇടതൂർന്നത് | ದಟ್ಟವಾದ | Dense |
| चकास्ति | शोभते | ശോഭിക്കുന്നു | ಶೋಭಿಸುತ್ತದೆ | Shines |
| चारु | मनोहरः | മനോഹരം | ಸುಂದರ | Beautiful |
| तारापथम् | गगनम् | ആകാശം | ಆಕಾಶ | The Sky |
| दरी | कन्दरम् | ഗുഹ | ಗುಹೆ | The cave |
| धूलीकलापः | रजःसमूहः | പൊടിപടലം | ಧೂಳಿನ ರಾಶಿ | A cloud of dust |
| नकुलः | सर्पहा | കീരി | ಮುಂಗುಸಿ | Mongoose |
| नवपयोदः | नवमेघः | പുതുമേഘം | ಹೊಸ ಮೋಡ | New cloud |
| निर्झरी | प्रवाहिनी | അരുവി | ಸ್ಟ್ರೀಮ್ | The stream |
| निशान्तम् | वासस्थानम् | വാസസ്ഥലം | ನಿವಾಸ | Residence |
| निषसाद | उपविशति स्म | ഇരുന്നു | ಕುಳಿತರು | Sat |
| नीडजः | खगः | പക്ഷി | ಹಕ್ಕಿ | Bird |
| पयस्विनी | नदी | നദി | ನದಿ | The river |
| पयःप्रणाली | कुल्या | കൈത്തോട് | ಕೈತೋಡು | Canal |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധമായത് | ಪ್ರಸಿದ್ಧ | Famous |
| बन्धुरम् | निम्नोन्नतम् | ഉയർന്നതും താഴ്ന്നതും | ಎತ್ತರ ತಗ್ಗು | The high and the low |

| | | | | |
|---|---|---|---|---|
| बर्हीं | मयूरः | മയിൽ | ನವಿಲು | Peacock |
| बिलम् | द्वारम् | മാളം | ಬಿಲ | Hole |
| महीधरः | पर्वतः | പർവ്വതം | ಪರ್ವತ | The mountain |
| राजिः | समूहः | കൂട്ടം | ಗುಂಪು | Group |
| वत्सः | गोशाबकः | പശുക്കുട്ടി | ಕರು | The calf |
| वनप्रियः | कोकिलः | കുയിൽ | ಕೋಗಿಲೆ | Cuckoo |
| शाखामृगः | वानरः | കുരങ്ങൻ | ಕೋತಿ | Monkey |
| सानुः | उपत्यका | താഴ്‌വാരം | ಕಣಿವೆ | Valley |
| सीरपाणिः | हलायुधः | ബലരാമൻ | ಬಲರಾಮ | Balarama |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| कविताम् आलपति। | | | |
| शतृ-शानच् पदानि चिनोति। | | | |
| लघूपन्यासं लिखति। | | | |
| सस्यसम्पुटं निर्माति। | | | |
| यथोचितं योजयति। | | | |
| सम्भाषणांशान् पूरयति। | | | |
| जीवनचरितं रचयति। | | | |

पूर्वस्यां कक्ष्यायां पठितानि कथानाटकादीनि अधिकृत्य चर्चां नयतु।